ष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः॥भूत-
कृद्भूतभृद्भावोभूतात्माभूतभावनः॥१॥
पूतात्मापरमात्माचमुक्तानांपरमागतिः।
अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोऽक्षरएवच
॥२॥योगोयोगविदांनेताप्रधानपुरुषेश्वरः
नारसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः
॥३॥सर्वःशर्वःशिवःस्थाणुर्भूतादिर्नि-
धिरव्ययःसंभवोभावनोभर्ताप्रभवःप्रभु
रीश्वर [illegible]॥स्वयंभूःशंभुरादित्यःपुष्क

राक्षोमहामनः ॥ अनादिनिधनोधाता
विधाताधातुरुत्तमः ॥ ५ ॥ अप्रमेयोहृषी
केशः पद्मनाभोऽमरप्रभुः ॥ विश्वकर्माम
नुस्त्वष्टास्थविष्ठःस्थविरोध्रुवः ॥ ६ ॥ अ
ग्राह्यः शाश्वतः कृष्णोलोहिताक्षःप्रतर्दनः
प्रभूतस्त्रिककुब्धामपवित्रंमंगलंपरम् ॥ ७
॥ ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठःप्र—
जापतिः ॥ हिरण्यगर्भोभूगर्भोमाधवोम-
धुसूदनः ॥ ८ ॥ ईश्वरोविक्रमीधन्वीमेधा

हरिनलिनगदाशंखपाणिर्मुकुन्दः ॥ १ ॥
अथवा ॥ भूः पादौ यस्य नाभिर्वियदसुरनि
लश्चन्द्रसूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौ
र्मुखमपि दहनो यस्य वासोऽयमब्धिः ॥ अं
तस्थं यस्य विश्वं सुरनरखगगोभोगिगंधर्व
दैत्यैश्चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमी
शं नमामि ॥ २ ॥ अथवा ॥ शांताकारं भुज
गशयनं पद्मनाभं सुरेशं ॥ विश्वाधारं गग
नसदृशं [illegible]र्णं शुभांगम् ॥ लक्ष्मीकांतं

वि॰ ७

कमलनयनं योगिभिर्ध्यानगम्यं॥ वन्दे वि-
ष्णुंभवभयहरं सर्वलोकैकनाथम्॥३॥
अथवा॥ मेघश्यामं पीतकौशेयवासं श्री
वत्सांकं कौस्तुभोद्भासितांगं॥ पुण्योपेतं
पुंडरीकायताक्षं विष्णुं वन्दे सर्वलोकैकना
थं॥४॥ अथवा॥ सशंखचक्रं सकिरीट
कुंडलं सपीतवस्त्रं सरसीरुहेक्षणम्॥
सहारवक्षःस्थलकौस्तुभश्रियं नमामि वि
ष्णुं शिरसा चतुर्भुजम्॥५॥ ॐ विष्णवे

भूनाथपच्छाशाालमरामरहे

तोरामोलोकोनसेपुधिंल्वोवम

रैप्रोफूलाजाकोजम:मेरिषनेष्व

रेमंदोलि॰बालजाकेहिंरु

मांदुकोउपनिसत

श्री इदंसारंसतंपढहइरंपतनवरपरी

नामतुर्थअंकीवोसधीमुरुतमि

श्री गणेशाय नमः श्री गणे
शाय नमः स्यादि न परमाद्य
पुरुष नरदपगाइपरिलेवाचली
नोऽपिपर आइपलगनेद
पूसिपीरराधस्थानग्रगणाः
मैननाशपोवान:स्त्रियेचा

तत॰ धिरूपः। जातिः सत्ता द्रव्यत्वगुणत्वकर्मत्वादिरुपाधिरूपं पा॰ वैधर्म्यविकल्पादि। प्रागभावा
दयस्तु प्रतियोगिभेदेनानंतास्तथा मध्यत्वपरत्वापरत्वाभावाः। अंधकारोप्यभावः। न्य
नानि स्वरूपमेव। विशिष्टं तु विशेषणविशेष्यतत्संबंधस्वरूपमेव। ज्ञातता ज्ञानविषयत्वं। सा सं३
रूपमुपाधिरूपं सामान्यं। लघुत्वं गुरुत्वाभावः। एवमन्यस्यापि पदार्थस्य सतोप्यत्रै
वांतर्भावः। यथा संख्यादिगुणे। एतेषु च मध्ये नित्यानां कारणत्वमेव। अनित्यानां का
रणत्वं कार्यत्वं च। तत्र कारणत्वं नाम समवायिकारणमसमवायिकारणं निमित्तका
रणं चेति त्रिविधं। अपरे भेदास्तत्स्वरूपमेवोहनीयाः। एवमेतेषां तत्त्वज्ञानमनिमेष
॥३॥ यहेतुः॥ तत्त्वमनारोपितं रूपं॥ तस्य ज्ञानमनुभवः॥ स च श्रवणमनननिदिध्यासन॥३॥
नि॰

कारण

नामपि। ऊहागमत्वन्द्ध्यवसायपयोत्क्लसंज्ञापदवा। सुखत्वंतु सांसारिकं स्वर्गादि। दुःखत्वंतु दुःखमात्रमेन
व। इच्छापि साध्यविषयासाधनविषयाच। द्वेषोपि साध्यविषयः साधनविषयश्च। प्रयत्नोपि
विहितनिषिद्धोदासीनविषयः। स्निग्धविघः। गुरुत्वं समाहारस्वरूपमेकावयविनिष्ठंच। द्रवत्वं सांसि
द्धिकं नैमित्तिकंच। स्नेहः स्वाभाविक औपाधिकश्च। संस्कारो वेगो भावना स्थितिस्थापकश्च। अ
धर्म्मः प्रवर्त्तको निवर्त्तकश्च। अधर्म्मफलावसानो नमस्कारादिनाश्यश्च। शब्दो वर्णात्म
कोऽवर्णात्मकश्च। अत्र गंधरसयोगविभागपरत्वापरत्वसुखदुःखद्वेषसंस्कारधर्म्मा
धर्म्मशब्दा अनित्यैकरूपाः। अन्येतु नित्यानित्यरूपाः। संयोगविभागसुखदुःखद
द्वेषसंस्कारधर्माधर्मशब्दा ऽव्यापकाः। बुद्धिइच्छाप्रयत्ना उभयरूपाः। अन्येतुव्यापका
पकाः। अत्रापेक्षापरत्वापेक्षेपरः। इच्छापि विहितनिषिद्धोदासीनविषयरूपा। सामान्यं जातिरूपमनुगा

स॰प॰

द्विविधा। स्मृतिरनुभवश्च॥ अनुभवोपि द्विविधः। प्रमा अप्रमा च। प्रमा प्रत्यक्षानुमि
तिश्चेति। अप्रमापि संशयो विपर्ययश्चेति। प्रत्यक्षं सप्तप्रकारकं। तच्चेश्वर घ्राणरसन
चक्षुःश्रोत्रत्वङ्मनोलक्षणैः। अनुमितिरपि त्रिविधा। लिंगस्य त्रैविध्यात्। केवलान्वयी
केवलव्यतिरेक्यन्वयव्यतिरेकी चेति। तदपि स्वार्थं परार्थं चेति। परार्थांगानि। प्रतिज्ञाहेतू
दाहरणोपनयनिगमनानि। त्रपपीगानि। पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तिर
बाधितविषयत्वमसत्प्रतिपक्षत्वं चेति। तथा हेत्वाभासाः। असिद्धविरुद्धानैकान्तिकान
॥२॥ ध्यवसितकालात्ययापदिष्टप्रकरणसमाः। तर्कस्त्वप्रमो संशयविपर्ययावेव। सविक ॥२॥
ल्पक[illegible]निर्विकल्पकयोस्तु प्रमायामप्रमायां चान्तर्भावः। एवं प्रसिद्धज्ञानानां पेक्षाणां
रामना पाद्यानो१

शी कौबेरी ईशानी नागी ब्राह्मी रौद्री चेत्येकादशविधा। आकाशादित्रयं वस्तुतस्त्वेकै क
मेव। उपाधिभेदान्नानात्वं। आत्मा तु द्विविधः। परमात्मा क्षेत्रज्ञश्चेति परमात्मा ईश्वर
एकएव। क्षेत्रज्ञा अस्मदादयो अनंता एव। मनस्तु परमाणुनिष्ठत्वादनंतं। आकाशादिपंच
कं नित्यमेव अपरं नित्यानित्यं च। रूपं तु सितलोहितपीतकृष्णहरितकपिशचित्रभे
दात्सप्तविधं। रसोपि मधुरतिक्तकटुकषायाम्ललवणचित्रभेदात्सप्तविधः। गंधस्तु द्वि
विधः। सुरभिरसुरभिश्च। स्पर्शः शीतोष्णानुष्णाशीतभेदात्त्रिविधः। संख्यैकत्वद्वित्व
बहुत्वभेदात्त्रिविधा। परिमाणं अणुमहद्दीर्घह्रस्वं चेति चतुर्विधं। पृथक्त्वमेका
नेकवृत्ति॥ संयोगो द्विविधः। कर्मजः संयोगजश्चेति। विभागो द्विविधः। कर्मजो विभा
गजश्चेति। परत्वं कालकृतं दिक्कृतं चेति। अपरत्वमपि कालकृतं दिक्कृतं चेति। बुद्धिरपि

खंडन
मनोरमा।
॥१॥साम

॥श्रीगणेशाय नमः॥श्रीसरस्वत्यै नमः॥इष्टदेवेभ्यो नमः॥विरोधिनां तिरोभावक्रमो यस्मिन्गिरां गणः
विश्वेश्वरं गुरुं शेषवंशोत्तंसं भजामि तं॥१॥वारितरिपुबंधोत्र स शब्दचक्रपाणिर्वरहरिं नल॥वि
हस्मंडलक्षचं तस्मरमतखंडनं तनुते॥हयवरट्॥हकारोपदेशो अड़ि एगो शलबलोऽस्य हकाग्र
हणार्थः॥यत्तु हयवरसूत्रे हकारोपदेशप्रयोजनमड्ङादौ तद्ग्रहणमिति तु कौहलस्त्व
मुपादायेत्तत्सूत्रप्रयोजनं शलादौ ग्रहणं तेनाधुक्षादित्यादिसिद्धिरित्युक्तं॥प्रथमं ह
कारोपदेशप्रयोजनं उत्तरत्र सूत्रप्रयोजनमिति मदेन ग्रहणे किं बीजं॥नत्तावदाद्ये
हकारानुपादानेऽड्ङादिग्रहणीयस्त्वत्रमावश्यकमिति हकारो किरं त्वेतु हकारानुपा
दाने लादयः प्रत्याहारा रेफसैवव्याख्याह्व इति लकारोऽपि नोपादेय इति सूत्रोपादानमि
ति तथा सति रेफात्पूर्वं हकारोपदेशो रफेणैव रलादिग्रहणेऽधुक्षादित्यादिसिद्धौ ल
कारोपादानानुकूल्येऽपि नेति विचिंत्यं॥किं तर्हि रमोपादानलकारोपादाने प्रयोजनमि

भज्ञ

पत्रँमनोभवमँगालकलशसहोदरे॥निजगादसायदुनंदनेक्रीड
गीत० तिहृदयानंदने॥१॥ध्रुवपदं॥अलिकुलगंजनमंजनकंरतिनाय
२८ कशायकमोचने॥त्वदधरचुंवनलंवितकज्जलमुज्जलयप्रियलोच
ने॥२॥नयनकुरंगतरंगविकाशनिरासकरेश्रुतिमंडलेमनसिजपा
शविलासधरेशुभवेसनिवेशायकुंडले॥३॥भ्रमरचयंरचयंतमुपरि
रुचिरंसुचिरंममसंमुखे॥जितकमलेविमलेपरिकर्मयनर्मज
नकमलकंमुखे॥४॥मृगमदरसवलितंललितंकुरुतिलकमलि २८

मिः ॥ कामशरैस्तदद्भुतमभूत्पत्युर्मनःकीलितं ॥ ४ ॥ व्यालोलःकेशा
पाशास्तरलितमलकैःस्वेदलोलौकपोलौ ॥ स्पष्टादष्टाधरश्रीकुच
कलशरुचाहारिताहारयष्टिः ॥ कांचीकांचिद्गताशांस्तनजघ
नपदंपाणिनाछाद्यसद्यः ॥ पश्यंतीस्वात्मरूपंतदपिविलुलित
स्रग्धरेयंधिनोति ॥ ५ ॥ अथसस्पृहसासुप्रीतिंसुरतांतनितांतखिन्ना
गी ॥ राधाजगादसादरमिदमानंदेनगोविंदं ६ ॥ रामकरीरागे ॥ २
४ ॥ कुरुपदुनंदनचंदनशिशिरतरेणकरेणपयोधरे ॥ मृगमद

टी॰ र॰ शक्यतावच्छेदकत्वे हि गौरवेण लाघवाद् अभावत्वस्यैव धर्मस्यैवेत न ह्यवच्छेदकत्वं लक्षणीकारपुरस्कृतम् इति संसर्गाभावत्वस्या-
पि तथ्योऽसत्त्वाद् इति चेन्न। घटो नास्तीत्यादौ संसर्गाभावत्वप्रकारकबोधे धात्वनुभवानुरोधेन घटः पटो नेत्यादौ चान्यो-
२ न्याभावत्वप्रकारकबोधानुभवानुरोधेन वा तयोः शक्यत्वात्। वस्तुतस्तु। घटो नास्तीत्यादावन्योन्याभावत्वस्यैव
मेव नञः शक्यतावच्छेदकत्वं न तु संसर्गाभावत्वमपि। न चैवं संसर्गाभावत्वेति ग्रन्थविरोधः। स्वाभावे चाप्रतियोगि-
तावच्छेदकत्वेन संसर्गविशिष्टाभावस्यैव तदर्थत्वात्। तादृशाभावत्व उपदर्शितरीत्या वस्तुगत्यान्योन्याभावत्वमेव
त्वेन ताभावत्वस्य नञः शक्यतावच्छेदकत्वे हि विरहः। न तु तथानुभवानरोधादन्योन्याभावत्वस्यैव नञः शक्यतावच्छे-
दकत्वेऽपि तेन वाच्यधर्मरूपेण नञः शक्यतावच्छेदकत्वलाभस्योपगमो निरर्थकः। संसर्गाभावत्वस्यापादि ग्रन्थस्तु शक्य-
प्रदर्शनपरो न शक्यतावच्छेदकत्वप्रदर्शनपर इति नानुपपत्तिर्ज्ञेयो वीतिवेत्तु। अन्योन्याभावत्वातिरिक्ताभावत्वे प्रमा-
णाभावेन तथात्वकमस्य कल्पनात्। अभावत्वस्यासारस्य प्रतीतेरन्योन्याभावत्वादन्योन्याभावत्वे धर्मान्तरवैशिष्ट्यम् विष-
यत्वस्याभ्युपगमेन तद्विषयत्वपर्यवसानासिद्धेरभावात्। न चैवं लाघवान्नञः शक्यतावच्छेदकत्वं तथात्वासिद्धेरिति वा-
च्यं। लाघवानुरोधेन शक्यतावच्छेदकत्वविशिष्टस्वरूपपदार्थान्तरासिद्धेः प्रसंगात्। नानार्थविशेषत्वप्रसंगान्नान्त-
नापि सर्वसाधारणातिरिक्तधर्मविशेषस्वीकृतस्यैव शक्यतावच्छेदकत्वस्वीकारो विस्तारादेवं समभावत्वस्यैव रामः
२

सर्गाभावेतादृशधर्माभावेननसूराकयतावच्छेदकत्वस्यतत्त्वसाध्यासत्वानुपपत्तेः।एवमन्योन्याभावेवमपि[illegible]त्ववेंडोपा
धिः।नतुतादृशस्यसंबंधावच्छिन्नप्रतियोगितावत्त्वाभावत्वंतत्र।संयोगित्वादृशस्यसंयोगरूपतयासंयोगितोऽस्यताभावेति
व्याप्तिः।संबंधविषयातादृशस्यानिष्टावच्छेदकत्वतयानिवेशोपिसंबंधावच्छिन्नप्रतियोगिताव्याभावातिव्याप्तेः।[illegible]
दिति।वस्तुतस्तु।अन्योन्याभावस्यप्रतियोगितावच्छेदकसंबंधेनानाभावेनतादृशस्यस्यतत्प्रतियोगितावच्छेदकसंबंधा-
त्वाभावात्तादृशलक्षणेप्रवेशमनुपपत्तेःरूपमेव।नचैवमभावमात्रस्यैवप्रतियोगितावच्छेदकसंबंधसद्भावेप्रमाणाभावइति
वाच्यं।तत्त्वेताभावस्यप्रतियोगितावच्छेदकत्वसंबंधानंगीकारेबाधकत्वं।प्रतिबध्यतावच्छेदकत्वविवचनानुपपत्तेः।तथाहि।
घटाभावप्रकारकज्ञानस्यप्रतिबध्यतावच्छेदकंनघटप्रकारकज्ञानत्वं।घटाभाववतिज्ञानकालेवृत्तपतितकेनसंबंधेनघ
टप्रकारकज्ञानस्यघटे।केनविशिष्टसंबंधेनतत्रैवनियमानुपपत्तेः।तथाचतादृशनियमानुरोधेनतेनसंबंधेनतत्प्रकार
कत्वांशेप्रतितत्संबंधावच्छिन्नतन्निष्ठप्रतियोगिताकाभाववत्ताविषयकस्यप्रतिबंधकत्वपाद्यः।अतः[illegible]वत्त्वेनात्व
ताभावप्रतियोगितावच्छेदकसंबंधसिद्धिः।नचैवमन्योन्याभावस्यापितादृशसिद्धौपुरुषेतुल्येतिवाच्यं।घटघटप्रकारक
बुद्धिंप्रतिघटान्योन्याभाववत्ताविषयत्वेनप्रतिबंधकत्वस्यकल्पनेनैवसामंजस्येविना[illegible]अन्योन्याभावप्रतियोगितावच्छे
दकसंबंधे[illegible]संबंधप्रतिबध्यप्रतिबंधकभावानुपपत्तिरूपबाधकाभावेनपुरुषेरतोऽन्यापादनंअनुपपन्नमपि[illegible]स्यानजू

...नासुकौशलमनुआनंच यहैष्मवंय स्छुंगारविवेकेतानर
२१ यानाकोवेबुलीलायितंम नास्वर्वजयदेवपरिउतकवेः हसै
कभूतामनसीनंदाष्यरिसोधयनुसुधियः श्रीगीतगो
विंदा २ श्रीभोजराजप्रभवस्यरामादेवीसुतःश्रीजयदेव
कस्य परासराद्दिप्रियवर्यकंठेसुश्रीतपीताम्वरमेनार
॥६ स्तु २ इतिश्रीगीतगोविंदेकृस्नचरित्रान्दवर्णनेद्वादशःसर्गः॥१२
सप्तेन्दुचन्द्रवसुभिर्गुणितेसहैलैसम्वत्सरेमाधवमासिपूते॥
वालेस्वपुस्तंउमनावृसिंहेनेनेनकेशान्नमतातिरूपान्॥११॥ २१

जितकमलेविमलंपरिकर्म्मयनर्म्मजनकमलकंमुख
मृगमदरसवलितंललितंकुरुतिलकमलीकरजनीक
रे कलितकलंकंकलंकमलाननविश्रमितश्रमसीकरे ६
ममरुचिरेचिकुरेकुरुमानदमनसजध्वजचामरे रतिग
लितेललितेकुसुमानिशिखंडिशिखंडकडामरे ७ सरस
घनेजघनेममसंवरदारणवारणकंदरे मणिरसनावसनाभरणानि
जघने शुभाशयवासयसुंदरे ८ श्रीजयदेववचसिरुचिरे हृदयंसदयंहृद
६ यंकुरुमंडनेहरिचरणस्मरणामृतकृतकलिकलुषज्वरख
ण्डने ९ रचयकुचयोःपत्रंचित्रंकुरुष्वकपोलयोर्घटयजघनेका
ञ्चीमंचस्रजाकबरीभरे कलयवलयश्रेणीपाणौपादेकुरुनूपु
राविति निगदितःप्रीतःपीताम्बरोपितथाकरोत् १ यद्गांधर्व

वि॰
ह॰

॥ अथ ... ङ्गन्यासः ॥ ॐ ॥
यकवचायहुं ॥ रथां ... सोभ्यः नेत्र
नेत्राभ्यांवौषट् ॥ शार्ङ्गधन्वागदाधरःवीर्या
यअस्त्रायफट् ॥ ऋतुःसुदर्शनःकालःभूर्भु
वःस्वरोमदिग्बन्धः ॥ इतिहृदयादिन्यासः
॥ ॐ ॥ अथध्यानं ॥ ॐ ॥ ॐ क्षीरोद
न्वत्प्रदेशेशुचिमणिविलसत्सैकतेमौक्तिका
नां मालाक्लृप्तासनस्थः स्फटिकमणिनिभै
मौक्तिकैर्मंडितांगः ॥ शुभ्रैरभ्रैरदभ्रैरुपरि
विरचितैर्मुक्तपीयूषवर्षैः रानन्दीनःपुनीया

ह

वीगे शंखभृन्नन्दकीचक्रीतिकीलकाय नमः करसंपुटे मम श्रीकृष्णप्रीत्यर्थे जपे-विनियोगाय नमः ॥ इति ऋष्यादिन्यासः ॐ विश्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः ॥ अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः ॥ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः सुवर्णबिन्दुरक्षोभ्य इत्यनामिकाभ्यां नमः ॥ आदिसोज्योतिरादित्य ... कनिष्ठिकाभ्यां नमः ॥ शार्ङ्गधन्वा ... इति

वि॰ रङ्गुष्ठाभ्यांनमः॥अथ ह्र...ङ्गन्यासः॥ॐ
५ विश्वंविष्णुर्वषट्कारइतिहृदयायनमः॥
॥अमृतांशूद्भवोभानुरितिशिरसेस्वाहा॥
ब्रह्मण्योब्रह्मकृद्ब्रह्मेतिशिखायैवषट्॥
सुवर्णविन्दुरक्षोभ्यइतिकवचायहुम्॥आ
दित्योज्योतिरादित्य इतिनेत्रत्रयायवौषट्
शार्ङ्गधन्वागदाधर इत्यस्त्रायफट्॥इति
हृदयादिन्यासः॥अथकरन्यासः॥ॐ ५
उद्भवाय अंगुष्ठाभ्यांनमः॥ॐक्षोभणाय

नर्जनीभ्यांनमः ॥ ॐ दैवायमध्यमाभ्यांनमः
॥ ॐ उद्भवाय अनामिकाभ्यांनमः ॥ ॐ सौ
भणायकनिष्ठिकाभ्यांनमः ॥ ॐ दैवायक
रतलकरपृष्ठाभ्यांनमः ॥ इति अन्यच्चकर-
न्यासः ॥ अथ अन्यच्च हृदयादिषडङ्गन्या
सः ॥ सुव्रतः सुमुखः सूक्ष्मः ज्ञानाय हृदया
यनमः ॥ सहस्रमूर्धा वि[illegible]त्मा ऐश्वर्याय-
शिरसे स्वाहा ॥ सहस्रा चि[illegible]
शिखायै वषट् ॥ [illegible]

अथ[illegible]ङ्गन्यासः ॥ ॐ ॥
यकवचायहुं ॥ रथांगपाणिः सौम्यः तेजसे
नेत्राभ्यांवौषट् ॥ शार्ङ्गधन्वागदाधरःवीर्या
यअस्त्रायफट् ॥ ऋतुःसुदर्शनःकालःभूर्भु
वःस्वरोमहिग्बन्धः ॥ इतिहृदयादिन्यासः
॥ ॥ अथध्यानं ॥ ॥ ॐ क्षीरोद
न्वत्प्रदेशेशुचिमणिविलसत्सैकतेमौक्तिका
नां मालाक्लृप्तासनस्थः स्फटिकमणिनिभै
मौक्तिकैर्मंडितांगः ॥ शुभ्रैरभ्रैरदभ्रैरुपरि
विरचितैर्मुक्तपीयूषवर्षै रानन्दीनः पुनीया ६


१ श्रीगणेशायनमः ॥ अथ आदौ ज्वराधिकारः तत्र प्रथमं ज्वरितोनिषेधमाह: परिषेकान्प्रदेहांश्च स्नेहान्संशो
धनानि च दिवास्वप्नं व्यायामं शिशिरं जलम् १ क्रोध प्रवातभोज्यानि वर्जयेन्नरः ज्वरी । परिषेकः स्नानादिः
प्रदेहो लेपनादि लकार्य्यं गर्भिणी बाल वृद्ध दुर्बल भीरु ति: लक्षया क्षुधाम क्रोधकामशोक विरज्वरे सन्निर्वेद नने
कार्य्य सामेस्त्वनेरपि लंघनं कार्य्य आमस्य लक्षणमाह ॥ अहार स्य रसः सारो यो न पक्वोऽग्निलाघवात् ॥
आमसंज्ञां स लभते बहुरोगसमाश्रयः इति अथ साम ज्वरस्य लक्षणम् लालाप्रसेका हृल्लासो हृदयागौर
वरोचकः ज्वराधिकमृद्धयो नास्रावबहु मूत्रता मलं च आमज्वरस्य चिन्हानि नात्र दद्यात्तु भेषजम् देह
सौ वमनो प्रस्थिति रिवेहदः पूर्णत्वं गौरवं ज्वरे नैव आमये कोष्ठे मन्दाग्नाबुदरे तथा आरोचके प्रति
श्याये प्रसेके [illegible] ये शोषये ॥ त्रयो वमथु मेहेच पानियं मंदमाचरेत् । वरलीदष्टवानशोथः कोष्ठः
प्रसेके क्षयरोगे मदरे प्रसेके पुरः ॥ स्वल्पं स्वल्पं जलं पिवेत् । सव्यमानेन शीतेन ज्वरस्तापेन वर्द्धते । वात
श्लेष्मा मधुत्ताय हितमुष्णाम्बुतृष्णते । स्वं क्वथितम् ॥ आहो दिन गपहिता पापपे क्वथितं ज
लम् ग्रष्मं भेदजलपाके मेह: । त्रिणादशेषं सलिलं मी क्वथार हिथास्यते हिमे; अर्धशेषं शिशिरे तथा

श्री०

भ० पदेशुभे॥ तस्यानुष्ठानमात्रेणसर्वपापैः प्रमुच्यते॥९॥ युधिष्ठिर उवाच॥ कृष्णकोयंत्वयाख्यातो
योनंतइतिविश्रुतः॥ किंशेषनागआहोस्वित् अनंतस्तक्षकस्मृतः॥१०॥ परमात्माथवानंतउता
होब्रह्म उच्यते॥ कएषोनंतसंज्ञोवैतथ्यंमेब्रूहिकेशव॥११॥ श्रीकृष्णउवाच॥ अनंतइत्यहंपा
५ र्थममरूपंनिबोधय॥ आदित्यादिषुवारेषु यः काल उपपद्यते॥१२॥ कलाकाष्ठामुहूर्त्ता
दिदिनरात्रिशरीरवान्॥ पक्षमासर्त्तुवर्षाणियुगकालव्यवस्थया॥१३॥ योयंकालोम ५
याख्यातः सोनंतइतिविश्रुतः॥ सोहंकालोवतीर्णोहि भुवोभारावतारणात्॥१४॥ दानवानां
विनाशायवसुदेवकुलोद्भव॥ मांविद्ध्यनंतत्वंपार्थ कृष्णंविष्णुंहरिंशिवं॥१५॥ ब्रह्माणं
भास्करंशेषंसर्वव्यापिनमीश्वरं॥ विश्वरूपंमहाकायंसृष्टिसंहारकारकं॥१६॥ प्रत्य

श्री ॥ श्रीगणेशायनमः श्रीभवानीजिसहाइ हनुमानजिसहाइ

श्रीगणेशायनमः ॥ श्रीभवानीजीसहाइ रामायनन्द
मःततेजोलिंसमाद्यं शिवमोवाचमुद्दहृतं ॥१॥ सूतउवाच
वाग्मीदिंआमिर्महाकालीमहेश्वरः भेदधारिसृतत्वाग्नि
लोकानांहितकाम्यया ॥२॥ श्रीशिवउवाच शिवानानि
धांविविधप्रभावांकालीकस्तामांनिन्नीविश्ववंद्यानि
पालनरक्षागधुरान्द मुउमालोविभूत्यामगवमेशोनी
॥३॥ अस्ककमास्तवशिवास्तनस्थाविभित्रांभीवंतिमूरारी
नरेलक्ष्मीर्यांमासमहाविष्णुरंलोकानीसरत्यंशरसंबुजाम
॥४॥ सकौरविजंचकपीस्वरस्यचितामारीकुंबकाधाम
रूपांविद्याचाविद्यापुनःकामराजंकामःकल्लाकामिनी



मरषाजसनतइलक्षिमनजिसनतइसनुलजिसनतकके

श्रीराम:

रा.गी. रामचंद्रकरकमलमुदारम् भजभजनायममलमनुदितरु
६ चिरमितरनुजपरियायम् पु धनकोरउविशिखमतिराम
मरामरुचामनोहरवेषम् ॥ मागधवसूचयविरुदधर
विविधवरगाभुमरेषम् २ स्फुरदंशुलिनरवराजविराजित
ममरनिकरकृतरागम् मुक्ताहरलसभूषितरत्नसंकुलसरासिज
मिव वरभागम् ३ धरममौक्तमम्पदंरसमपुनमानिजकलासु
प्रवीणम् श्रीरघुकुलमंडपमरंजनमनुपममजजनहीनम् ६
४ धर्मादिकफलदानमितमहालिंगमजशंकरमलिनीतम् ॥ ६

पूज्य-पूजकयोर्मध्ये प्राचीं प्रकल्प्य प्रदक्षिणक्रमेण पूजयेत् ॥ तद्यथा ॥ त्रिकोणमध्ये मूलमन्त्रेण देवीं गन्धादिभिः सम्पूज्य [मूलमन्त्रः—ओं ऐं ह्रीं क्लीं चामुण्डायै विच्चे] ततः त्रिकोणस्य पूर्वकोणे ॥ ओं सरस्वतीसहिताय ब्रह्मणे नमः ॥ नैर्ऋत्यकोणे ओं श्रीसहिताय विष्णवे नमः ॥ वायव्यकोणे ॥ ओं उमासहिताय शिवाय नमः ॥ उत्तरे ॥ सिंहासनाय नमः ॥ दक्षिणे ॥ महिषाय नमः ॥ इति त्रिकोणदेवताः सम्पूज्य ॥ अथ षट्कोणे पूर्वादिक्रमेण ॥ ओं नं नन्दजायै नमः ॥ ओं रं रक्तदन्तिकायै० ॥ ओं शां शाकम्भर्यै० ॥ ॐ दुं दुर्गायै० ॥ ॐ भीं भीमायै० ॥ ॐ भ्रां भ्रामर्यै० ॥ अथाऽष्ट दले वाममार्गक्रमेण ॥ ॐ ब्रां ब्राह्म्यै नमः ॥ ॐ मां माहेश्वर्यै नमः ॥ ॐ कौं कौमार्यै नमः ॥ ॐ वैं वैष्णव्यै नमः ॥ ॐ वां वाराह्यै ॥ ॐ नां नारसिंह्यै नमः ॥ ॐ ऐं ऐन्द्र्यै नमः ॥ ॐ चां

दु० चामुण्डायै नमः ॥ गन्धाक्षतपुष्पाणि समर्पयामि ॥ ततश्चतुर्विंशति- पू०
१७९ दलेष्वपि तेनैव क्रमेण ॥ ॐ विं विष्णुमायायै नमः ॥ ॐ चें
चेतनायै नमः ॥ ॐ बुं बुद्धयै नमः ॥ ॐ निं निद्रायै नमः ॥ ॐ
क्षुं क्षुधायै नमः ॥ ॐ छां छायायै नमः ॥ ॐ शं शक्त्यै नमः ।
ॐ तृं तृष्णायै नमः ॥ ओं क्षां क्षान्त्यै नमः ॥ ओं जां जात्यै
नमः ॥ ओं लं लज्जायै नमः ॥ ओं शां शान्त्यै नमः ॥ ओं श्रं श्रद्धायै
नमः ॥ ओं कां कान्त्यै नमः ॥ ओं लं लक्ष्म्यै नमः ॥ ओं धृं धृत्यै
नमः ॥ ओं वृं वृत्यै नमः ॥ ओं श्रु श्रुत्यै नमः ॥ ओं स्मृं स्मृत्यै
नमः ॥ ओं तुं तुष्ट्यै नमः ॥ ओं पुं पुष्ट्यै नमः ॥ ओं दं दयायै
नमः ॥ ओं मां मात्रे नमः ॥ ओं भ्रां भ्रान्त्यै नमः ॥ गन्धाक्षत-
पुष्पाणि समर्पयामि ॥ ततो बहिर्भूगृहचतुःकोणेषु ॥ तत ईशान्याम् ॥ १६९
ओं गं गणपतये नमः ॥ आग्नेय्याम् ॥ ओं क्षें क्षेत्रपालाय नमः ॥

नैर्ऋत्याम् ॥ ओं बं बटुकाय नमः ॥ वायव्याम् ॥ ओं यों योगिनीभ्यो नमः ॥ गन्धाक्षतपुष्पाणि स० ॥ पुनः पूर्वादिक्रमेण ॥ ओं लं इन्द्राय नमः ॥ ओं रं अग्नये नमः ॥ ओं यं यमाय नमः ॥ ओ क्षं निर्ऋतये नमः ॥ ओं वं वरुणाय नमः ॥ ओं यं वायवे नमः ॥ ओं सौं सोमाय नमः ॥ ओं हं रुद्राय नमः ॥ ओं ब्रं ब्रह्मणे नमः ॥ ओं अं अनन्ताय नमः ॥ गन्धाक्षतपुष्पाणि समर्पयामि ॥ तद्बाह्ये पूर्वादिक्रमेण ॥ ओ वं वज्राय नमः ॥ ओं शं शक्तये नमः ॥ ओं दं दण्डाय नमः ॥ ओं खं खड्गाय नमः ॥ ओं पं पाशाय नमः ॥ ओं अं अंकुशाय नमः ॥ ओं गं गदायै नमः ॥ ओं त्रिं त्रिशूलाय नमः ॥ ॐ पं पद्माय नमः ॥ ॐ चं चक्राय नमः ॥ गन्धाक्षतपुष्पाणि समर्पयामि ॥ अथाऽङ्गपूजा ॥ ॐ दुं दुर्गायै नमः पादौ पूजयामि, एवं सर्वत्र नामाऽन्ते पुष्पं क्षिपेत् ॥ ॐ गिं गिरिजायै नमः गुल्फौ

पूजयामि ॥ ॐ अं अपर्णायै नमः जानुनी पूजयामि ॥ ॐ हं
हरिप्रियायै नमः ऊरू पूजयामि ॥ ॐ पं पार्वत्यै नमः कटिं
पूजयामि ॥ ॐ आं आर्यायै नमः नाभिं पूजयामि ॥ ॐ जं जगन्मात्रे
नमः उदरं पूजयामि ॥ ॐ मं मंगलायै नमः कुक्षिं पूजयामि ॥
ॐ शिं शिवायै नमः हृदयं पूजयामि ॥ ॐ मां माहेश्वर्यै नमः कण्ठं
पूजयामि ॥ ॐ विं विश्ववन्द्यायै नमः स्कन्धौ पूजयामि ॥ ॐ कं
काल्यै नमः बाहू पूजयामि ॥ ॐ आं आद्यायै नमः हस्तौ पूजयामि ॥
ॐ वं वरदायै नमः मुखं पूजयामि ॥ ॐ सुं सुवाण्यै नमः नासिकां
पूजयामि ॥ ॐ कं कमलाक्ष्यै नमः नेत्रे पूजयामि ॥ ओं अं अम्बि
कायै नमः शिरः पूजयामि ॥ ओं दें देव्यै नमः सर्वाङ्गं पूजयामि ॥ ओं
देव्या दक्षिणे सिंहं पूजयामि ॥ ॐ देव्या वामे महिषं पूजयामि ॥
इत्यङ्गपूजां कृत्वा ॥ दशाङ्गं गुग्गुलं धूपं चन्दनाऽगरुसंयुतम् ॥ मया

निवेदितं भक्त्या गृहाण परमेश्वरि ! ॥ ॐ कर्दमेन प्रजा भू० ॥ ॐ भू० दुर्गायै० धूपं आघ्रापयामि ॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवि ! त्वं त्रैलोक्यतिमिरापहम् ॥ ॐ आपः स्रजन्ति० ॥ ॐ भू० दुर्गायै० दीपं समर्पयामि ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ॥ भक्ष्यभोज्यसमायुक्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥ ॐ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां० ॥ ॐ भू० दुर्गायै नैवेद्यं सम० ॥ आचमनीयम् ॥ मध्ये पानीयम् ॥ उत्तरापोशनम् ॥ हस्तप्रक्षालनम् ॥ मुखप्रक्षालनम् ॥ आचमनीयं पुनः ॥ मलयाचलसम्भूतं कस्तूर्यादिसमन्वितम् ॥ करोद्वर्तनकं देहि गृहाण परमेश्वरि ! ॥ ॐ अंशुना ते ॐ भू० दुर्गायै० करोद्वर्त्तनं स० ॥ इदं फलं मया देवि ! स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ कर्पूरैलासमायुक्तं ताम्बूलं

प्रतिगृह्यताम् ॥ ॐ आर्द्रां यः करणीं यष्टीं पिङ्गलां० ॥ ॐ भू०
दुर्गायै० ऋतुफलं पूगीफलं च समर्पयामि ॥ हिरण्यगर्भगर्भस्थं
हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
ॐ तां मा ऽआवह० ॥ ॐ भू० दुर्गायै दक्षिणां स० ॥ कदलीगर्भ-
सम्भूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥
ॐ इदꣳ हविः ॥ ॐ भू० दुर्गायै० आर्तिक्यं स० ॥ यानि कानि
च पापानि जन्मान्तरकृतानि च ॥ तानि सर्व्वाणि नश्यन्ति प्रदक्षिण-
पदे पदे ॥ ॐ यः शुचिः प्रयतो भूत्वा० ॥ ॐ भू० दुर्गायै० इत्येकां
प्रदक्षिणां समर्पयामि ॥ नानासुगन्धपुष्पाणि यथाकालोद्भवानि च ॥
पुष्पाञ्जलिर्मया दत्तं गृहाण परमेश्वरि! ॥ ॐ यज्ञेन यज्ञ० ॥ ॐ राजा-
धिराजाय० ॥ ॐ विश्वतश्चक्षुः ॥ ॐ आयङ्गौ० ॥ ॐ अम्बेऽअ-
म्बिके० ॥ ॐ श्रीश्च ते० ॥ ॐ भू० दुर्गायै नमः पुष्पाञ्जलिं सम० ॥

ततः साष्टाङ्गं प्रणामं कृत्वा ॥ प्रार्थयेत् ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ! ॥ यत्पूजितं मया देवि ! परिपूर्णं तदस्तु मे ॥ १ ॥ महिषघ्नि महामाये ! चामुण्डे ! मुण्डमालिनि ! ॥ यशो देहि धनं देहि सर्वान् कामाँश्च देहि मे ॥ २ ॥ जयन्ती मङ्गला काली० ॥ ३ ॥ दुर्गमे दुस्तरे कार्ये भव दुःखविनाशिनि ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ॥ ४ ॥ भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ! ॥ देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥ ५ ॥ सर्वमङ्गलमाङ्गल्ये० ॥ ६ ॥ रूपं देहि यशो देहि भगं भवति ! देहि मे ॥ पुत्रान् देहि धनं देहि सर्वान् कामाँश्च देहि मे ॥ ७ ॥ इति प्रार्थना ॥ ततः पाठसमाप्तिदिवसपर्यन्तं प्रतिदिवसं कुमारीपूजनं कुर्यात् ॥ अथवा ॥ हवनसमाप्तिदिवसे एकतन्त्रेण नवकुमारीं बटुकत्रयं पूजयेत् ॥ ततः प्रत्यहं बलिदानं माषदधिकूष्माण्डेन वा इक्षुदण्डेन नारिकेलेन वा

दद्यात् ॥ अथवा ॥ अन्ते बलिदानम् ॥ ततः अखण्डदीपं प्रतिष्ठापयेत् ॥ अखण्डदीपकं देव्याः प्रीतये नवरात्रकम् ॥ उज्ज्वालयेदहोरात्रमेकचित्तो धृतव्रतः ॥ एवं देवीं सम्पूज्य चण्डीपाठं कुर्यात् ॥

इति शतचण्डी-सहस्रचण्डी-पूजनविधानपद्धतिः समाप्ता ॥

अथ न्यासाः ॥ अस्याः श्रीचण्डीसप्तशत्याः प्रथममध्यमोत्तमचरित्राणां ब्रह्म-विष्णु-रुद्रा ऋषयः गायत्र्युष्णिगनुष्टुप्छन्दांसि श्रीमहाकाली-महालक्ष्मी-महासरस्वत्यो देवताः ऐँ ह्रीँ क्लीँ बीजानि ॥ अग्निवायुसूर्यास्तत्त्वानि ऋग्यजुःसामवेदा ध्यानानि श्रीमहाकाली-महालक्ष्मी-महासरस्वतीप्रीत्यर्थं सप्तशतीपाठे (वा सम्पुटितपाठे) विनियोगः । ॐ ब्रह्म-विष्णु-रुद्रऋषिभ्यो नमः शिरसि ॥ ॐ गायत्र्युष्णिगनुष्टुप्छन्देभ्यो नमः मुखे ॥ ॐ महाकाली-महालक्ष्मी-महासरस्वतीदेवताभ्यो नमः हृदि ॥ ॐ ऐं ह्रीं क्लीं बीजेभ्यो नमः गुह्ये ॥